श्री चुडामणिरचिता

# रसकामधेनु संहिता

## तदन्तर्गतश्चतुर्थश्चिकित्सापादः

संशोधकः मुद्रकश्च

रसवैद्य जीवराम कालीदास शास्त्री

आयुर्वेदाचार्यः

मूल्य रु० ४१–००

रसवैद्य जीवराम कालीदास शास्त्री, गोंडल प्रकाशितस्य प्रतिरूपम्

श्री चुडामणिरचिता

# रसकामधेनु संहिता

## तदन्तर्गतश्चतुर्थश्चिकित्सापादः

संशोधकः मुद्रकश्च

रसवैद्य जीवराम कालीदास शास्त्री

आयुर्वेदाचार्यः

चौखम्भा ओरियन्टालिया

प्राच्यविद्या तथा दुर्लभ ग्रन्थों के प्रकाशक एवं वितरक

पो० आ० चौखम्भा, पोस्ट बाक्स नं० १०३२

गोकुल भवन, के० ३७/१०९, गोपाल मन्दिर लेन

समीप मैदागिन, गोलघर, वाराणसी

# भूमिका

नाविदितमार्यैः कियती महत्ता रसशास्त्रस्य दैवीचिकित्साभिधेयस्येति. वर्तमानकालीननूतनाविष्कारप्रतिपादितसिद्धांतैरप्रस्थानमाप्नोति जंतुवादो नितान्तम्. तेन निश्चीयते यद्भिन्नभिन्नरोगोत्पादनकारणं जंतुवैविध्यमिति. नूनमाङ्ग्ला युरोपीयाः कांश्चिद्रसः कांश्चिद्बलिः कांश्चित्सौभाग्यः कांचिद्विषं कांश्चित्तालकुनटीकनकविषतिंदुकाद्या विनाशयंति विविधरोगजन्तूनिति मन्यंते जर्मन्यमेरिकांग्लांडादिदेशजा डाक्टराश्चाविष्कृतश्च. तादृशानितरांस्तदनुसारिणो निवदेयामः सुमुग्धमानसान्स जंतुवादः सुतरां ज्ञातपूर्वः सहस्रशः संवत्सरेभ्यः प्रागेवावगतोऽस्मदाविष्कृद्भिर्भिन्नभिन्नरसाद्यौषधीद्रव्यैर्नानाविधजन्तुनाशकरसिद्धांतः प्रतिपादितः सादरीकृतश्चोपकारधिया जगति शतसहस्ररसग्रन्थागारैर्दरीदृश्यत इति.

रक्ताभिसरणज्ञानं युरोपियेन केनचिदाविष्कृतं मन्यमानाः स्वलंरयायुर्वेदानभिज्ञतया हास्यतामुपयांति सांप्रतमवगतप्रायं तज्ज्ञैरेवेति स्वीयं विस्मृतवंतोऽन्यदीयं धन्यवादार्हं मन्यमाना नजानीमोयदस्मदीयमेव प्राक्तनं, नूत्नरूपेणावगुंठितं वस्तु युरोपीयरूपमवगतमिति

जर्मनीयाः सूताभ्रागाद्वा स्वर्णक्रियां कुर्वाणा मोहयन्ति जगद्यद्वेहो किमिति कीदृगयं शोधः!! परमस्मन्मनसि न मनागप्याश्चर्यमौत्सुक्यमस्मद्रसाचार्यैः प्राक्तनैर्विरचितेषु शतसहस्ररसग्रन्थेषु तत्प्रतिपदमुपलभ्यतेवलोक्यते सहस्रशःसंख्याकाः स्वर्णसिद्धिप्रयोगाः ईदृशैरन्यैर्नानाविष्कारकारिभिः स्वनामधन्यं कुर्वद्भिर्मूढमानसा वयं न जानीमः स्वकीयमेव सर्वमिदं परिवर्तितरूपमिति परं हंत! भूपतिभिस्त्यक्ताः स्वशास्त्राश्रद्धालुभिरवमता वित्तविहीना निराश्रिताः किं कर्तव्यमूढाः किमितिकुर्मो वयम्?

अस्मद् "रसशाला ग्रन्थभंडार" स्थिता बहवो धातुवादीया रोमांचकारिणो ग्रन्था हस्तलिखिता विलसंति यन्निरीक्षंतः संतः संतोषमपरिमितं यांतीति नं चित्रं भूरिद्रविणसाध्यांस्तदंतर्गतान्रससिद्धिप्रयोगान्साधयितुमुद्यमिनो वयं महतो रसग्रन्थान्प्रकटयितुमुत्सहामहे विना समयहानिं.

# विषयानुक्रम

विषयाः ... पृष्ठांकाः

## अधिकारः १


ज्वरप्रकरणम् ... १
सात्म्यासात्म्यादि ... २
पथ्यान्याह ... ४
तरुणज्वरेकुपथ्यम् ... ५
विघ्नगणेश रसः ... ६
रविसुंदर ... ,,
ज्वरारिरसराज ... ,,
नवज्वरेभसिंहः ... ७
नवज्वर गजांकुशः ... ,,
(उदकमंजरी रसः)
नवरेभसिंहः ... ,,
वातज्वरारिः ... ,,
सर्वज्वरहरः ... ८
नवज्वरधूमकेतुः ... ,,
हिंगुलेश्वरः ... ,,
पीयूषसुंदरी ... ,,
नवज्वरारि ... ,,
गदमुरारि ... ९
त्रैलोक्यडुंबर ... ,,
ज्वरध्वांतदिवाकरः ... ,,
विनोदविद्याधर ... ,,
त्रिपुर भैरव ... १०
नवज्वरांकुश ... ,,
ज्वरहरः ... ,,
स्वच्छंद भैरव ... ,,
स्वच्छंद भैरव ... ,,
पंचानन ... ११
ज्वर पंचानन ... ,,
,, ... ,,
पंचवक्र ... ,,
,, ... १२
ज्वरांकुश ... ,,
सर्व ज्वरहर ... ,,
लोह गुटीका ... ,,
ज्वरेभसिंह ... १३
मृतसंजीवन ... ,,
शंकर वटीका ... ,,
नव ज्वर रीपु ... ,,
चंद्रशेखर ... १४
सूरूप ... ,,
नवज्वर हर ... ,,
ज्वरघ्नी ... ,,
दिनज्वर प्रशमनी वटी ... ,,
संधिपातज्वरनिदानम् ... १५
ब्रह्मास्त्र रस ... १७
उन्मत्त ... १८
नस्य भैरव ... ,,
मोहान्धसूर्य ... ,,
संज्ञा करण ... ,,
भस्मेश्वर ... ,,

## अथ नवज्वरेभसिंह रसः

शुद्धसूतं तथा गन्धं लोहं ताम्रं च सीसकम् ।
मरिचं पिप्पली विश्वं समभागानि चूर्णयेत् ॥ ८० ॥
अर्धभागं विषं दत्वा मर्दयेद्वासरद्वयम् ।
श्रृंगवेरानुपानेन दद्याद् गुंजाद्वयं भिषक् ॥ ८१ ॥
नवज्वरे महाघोरे वातसंग्रहणीगदे ।
नवज्वरेषु सर्वेषु रसोयं रोगनाशनः ॥ ८२ ॥

## (नवज्वरगजांकुश) उदकमंजरीर सः

शुद्धसूतं समं गन्धं टंकणं मरिचं समम् ।
मर्दयित्वा दिनं शुष्कं मीनपित्तेन भावयेत् ॥ ८३ ॥
सप्तवारं ततः शुष्कं स्थापयेद्दन्तभाजने ।
शर्करार्द्रकनीराभ्यां वल्लयुग्मं प्रदापयेत् ॥ ८४ ॥
प्रवर्तयेत्ततो धर्मे यावज्ज्वरविनाशनम् ।
तक्रौदनं सवृन्ताकं पथ्यमत्र प्रदापयेत् ।
जहाति तं ज्वरं शीघ्रं नवज्वरगजांकुशात् ॥ ८५ ॥

## अथ ज्वरेभसिंह रसः

पारदं गंधकं ताम्रं विषं तुल्यं विमर्दयेत् ।
शेफालिकास्वरसतो भावयेदातपे दृढे ॥ ८६ ॥
श्रृंगवेराम्बुना तद्वद्भावितं सिद्धिमाप्नुयात्
गुंजैकं ससितं दद्याच्छृंगवेराम्बुना भिषक् ॥ ८७ ॥
अभ्यंगस्तिलतैलेन कृत्वा स्नानं हिमोदकैः ।
पित्तरोगे तथोष्णेन विदध्यात्पयसा ततः
तत्तच्छीतोपचारैस्तु हन्यात्तत्तदुपद्रवान् ॥ ८८ ॥

## अथ वातज्वरारि रसः

गन्धकं दरदं सूतं खल्वे तुल्यं विमर्दयेत् ।
भावयेदार्द्रकद्रावैः सप्तधा पिप्पलीजलैः ॥ ८९ ॥
मरिचस्य कषायेण विजयास्वरसेन च ।
कृष्णधत्तूरनीरेण प्रत्येकं सप्त भावनाः ॥ ९० ॥
पिप्पलीमधुना ह्येष रसो वातज्वरापहः ।
वातज्वरारिनामायं प्रयुक्तो रससागरे ॥ ९१ ॥